भट्टोजिदीक्षितमहोदयान् प्रणम्य इति मे परिग्रहः ५ उद्गतसमस्यापि कार्यत्वादिति भावः ५ श्रोतॄणामनुषंगतः कार्ये प्रसंगतः

ॐ ॥ निर्विघ्नं ग्रंथसमाप्त्यर्थं ग्रंथादौ ग्रंथमध्ये ग्रंथांते च मंगलमाचरणीयमिति शिष्टाचारपरिपालनार्थं च क्रियमाणमुनित्र
यनमस्कारात्मकस्य मंगलाचरणस्य शिष्याणां प्रत्येवं कुर्युरिति शिक्षणार्थं श्रोतॄणामनुषंगतो मंगलाचरणसिद्ध्यर्थं मा
स्तिकमार्गप्रवर्तनार्थं च निर्बंधकुर्वन्नि कीर्तितं प्रति जानीते मुनित्रयमिति मया भट्टोजिदीक्षितेनेयं वैयाकरणसिद्धांतकौ
मुदी विरच्यते किं कृत्वा मुनित्रयं नमस्कृत्य च पुनः किं कृत्वा परिभाव्येत्यन्वयः तत्र भट्टंतीति भट्टाः भट भाषणे इत्यस्मादौ
णादिके तनिपुत्त्वे च सिद्धं ततः [illegible] दर्थात् उ नाम तर्केण शास्त्रविचारेणेति यावत् जयति ॥ प्रपकृष्टतां प्राप
यन्नुत्कर्षतां प्राप्नोतीति भट्टोजिः क्विप्त्वा उभयत्र तु गुणाभावस्तु ॥ ष्णानिल्लोडित्त्राकारोच्चारणमूलके नागम
शास्त्रानित्यत्वेन ॥ ओर्गुण इत्यत्र ॥ ओरोदित्येव वक्तव्ये गुणग्रहणमूलके न संज्ञापूर्वको विधिरनित्य इत्येतन्न्यायेन
च सिद्धः ॥ अथवा भट्टानां कृत्स्नभट्टानुतर्केण ॥ अजेति दिवंति ॥ अपास्ति करोतीति यावत् भट्टोजिः ॥ अजेर्व्यघञपोः सर्वधातुभ्य इन्
इतीन्प्रत्ययः वी ॥ आदेशाभावस्तु विभाषाया व्यवस्थितत्वान्नेष्टः ॥ अभिन्यदेपूर्वौ क्रोधितं शोनास्ति दीक्षणं दीक्षा उपदे
शार्थं कांक्षी दीक्षितः गुरोश्च हलः इत्यप्रत्ययः समासं जाता ॥ अस्येति दीक्षितः स्तारकादित्वादितच् भट्टोजिश्चासौ दीक्षितश्च भट्टोजि
दीक्षितः स्तेन भट्टोजिदीक्षितेनात्रानभिहितत्वेन कर्तरि तृतीयेति भट्टोजिदीक्षितेनेत्यस्य पदस्य व्याख्यानं । ततो व्या
क्रियंते ॥ साधुत्वेनाविभज्य साध्यं वः शब्दा बोध्यंते ॥ अनेनेति व्याकरणं ल्याङ्पूर्वकात् करोतेः करणार्थे ल्युट् नन्वेतद्योगमा
त्रे को शोध्यनि प्रवृत्तमिति चेद्युद्धे साधक व्याख्याविशिष्टसूत्रे व्याख्याकरणत्वेन परिभाषितत्वात्स्यस्य शास्त्रम् नन्वेवं स
त्रे मध्यीयानं प्रति किं पठ्यते इति प्रश्ने व्याकरणमिसुत्तरं नोपपद्यते इति चेन्न समुदायेषु प्रवृत्ताः शब्दा ॥ अवयवेष्वपि भवंते इ
न्यायेन तादृशासरसिभवात्सूत्रस्य व्याकरणं तु व्याकरणस्य सूत्रमिति प्रयोगानुपपत्तिग्रस्तम् ॥ अथ वार्त्तिकभाष्ययोर्व्याप्ति
स्तयोर्व्याख्याविशिष्टरूपत्वाभावादिति चेद्व्याकरणं व्याख्याविशिष्टसूत्रवार्त्तिकभाष्याण्यतमत्वमिति ग्रहणम् तथा च तत्रेनसानवै
वं न्यायसत्त्वादावर्त्तितव्याप्तिरितित्तन्न शब्दान्वाख्यायकत्वेन विशेषणात् एतेनुशब्दसाधकमिसुक्तौ शब्दानित्यत्वप्रसक्तिरित्ययास्त
भट्टोजिसंतर्केनदीक्षितेवंशोद्भवेनेति भावः ७

[illegible]

कौमुदीशब्दस्य ज्योत्स्नावाचकत्वात् ७

शब्दान्वाख्यायकत्वं तु प्रकृतिप्रत्ययादिकल्पनाद्वारक साधुत्वबोधकत्वं ततो व्याकरणमधीयते विदुर्वा वैयाकरणाः तदधीते तद्वेदे

त्यण् यस्येति इति लोपः न य्वाभ्यामिति वृद्धिनिषेधे ऐजागमो प्रसेध्वीदिति सिद्धः संएव वर्णाः सिध्यते गत्यर्थेति कर्तरि क्तः प्रतोन्ति के सव

सितेदूसेत कौशप्राभावे पनिष्ठप्रायार्थ कान्तशब्दस्य सिद्धशब्दस्य सिद्धान्तो निष्ठप्रायो येषामर्थे पुत इति विग्रहे समासे सिद्धान्ताः प्रमालि

कत्वेनावगतार्थाद्वस्येषः धरा पृथ्वीति तिष्ठ कुरित्यमरकोशात् कुशब्दस्य पृथ्वीवाचकत्वमिति कौ पृथ्व्यां मोदते मोदयती त्यर्थे कुश

ब्दपूर्वाद्दन्तर्भावितण्यर्थान्मोदतेरिगुपधेति के कुशब्दोनिष्पन्नशब्दवाचकस्तस्येयं कौमुदी तस्येदमितीदमर्थे अण् अत्र संततत्वादि टिड्ढाणञ

ञिति ङीप् अन्यत्सर्वं सुगमं ततो वैयाकरणसिद्धान्तानां कौमुदीति विग्रहे वैयाकरणसिद्धान्तकौमुदीति षष्ठीसमासः ननु चंद्रिका कौमुदी

ज्योत्स्नेत्यमरः ग्रंथे कौमुदीत्वं बाधितमिति चेदत्राहुः सादृश्येन ग्रन्थे कौमुदीशब्दप्रयोगात् यथा कौमुदी अन्धकारनाशद्वारा घटपटा

दिः प्रकाशिका यथा च घर्मसंतप्तस्य शीतप्रदात्रीत्वेन संतापनाशिका यथा च कौमुदीस्य संसारत्वापस्तम्भन चौरणाभावाद्धि सा भयेन चौरेभ्यो दुः

खप्रदात्री तस्मात् दुर्जनेभ्यः सुखप्रदात्री ग्रीष्माद्यृतुषु कांतायुक्तेभ्यो विरहितेभ्योतितलताप्रदा नह्यानंदप्रददातितद्वत्तेभ्यः कामिभ्यस्तस्मात् रण

एवं कमतिपीडां करोति तथायं बुद्धिगतान्धकारनाशपूर्वकवैयाकरणसिद्धान्तावबोधकः प्रतिदुरूहग्रन्थान्तरेभ्यः सिद्धान्तज्ञानेजायमान

स्य क्लेशरूपस्य संतापस्य शामकः कृत्स्नमहादिग्रंथखलुकत्वेन तेभ्यो दुःखप्रदाता अस्मदादिभ्यः कीर्त्यादिप्रदायकत्वेन सुखप्रदाता बुद्धियु

क्तेभ्यः सुखप्रदाता बुद्धिहीनेभ्यो दुःखप्रदाता चातिकठिनत्वेन ज्ञातुमशक्यत्वात् सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं नि

रूपकेति व्याप्तिवारणाय समंतरस्थपिपीलिकादौ हस्त्यादिसादृश्यवारणाय विशेष्ये पिपीलिकादेरपि स्वगतभूयोधर्मवत्त्वात् हस्त्यादि

सादृश्यवारणाय तद्गतेति उपमानगतेति तदर्थः भूयः पदमल्पधर्ममादाय सादृश्यवारणाय ननु तथापि घटादौ चंद्रसादृश्यं व्यवहा

वा रः स्यात् तेऽपि तद्भिन्नत्वे सति तद्गत ज्ञेयत्व प्रमेयत्वादिरूपभूयोधर्मवत्त्वादिति चेन्न आसाधारणभूयोधर्मवत्त्वस्य विवक्षितत्वात् अं

सवारणाय भूयः पदस्यानेकार्थपदेनोक्तमिति बोध्यं इयमिति ननु इदमस्तु सन्निकृष्टे इदमिति उक्तेः कथमसन्निकृष्टायाः कौमुद्याः क

यमियमित्युक्तिरिति चेद्बुद्धिविनोपि बुद्ध्याविषयीकरणं तयाक्तेरिति विरच्यत इति वीतिप्रत्ययकृत्पदं तिङन्तेन समासविधायकाभावात् न

च सहेति योगविभागात् तिङन्ते नापि समास इति वाच्यम् योगविभागस्येष्टसिद्ध्यर्थत्वे न छंदस्येव तेन समासविधानात् तथैव भाष्यादौ